Ex/Sans/PG/2.3/2019

# Master of Arts Examination, 2019

(1st Year, 2nd Semester)

**SANSKRIT**

**Course : VIII**

## [Sanskrit Drama]

Full Marks : 30 Time : Two Hours

*The figures in the margin indicate full marks.*

१. 'अचिरादेव संपादनीयो दौर्हद इति ...'

कस्मिन् प्रसङ्गे कमुद्दिश्य कस्य उक्तिरियम्? दौर्हद-संपादनार्थं का व्यवस्था निर्दिष्टा? दौर्हदसंपादनवृत्तमवलम्ब्य किं नाटकीयं तात्पर्यं साधितं नाट्यकारेण? 1½+½+½+½+5=8

**अथवा,**

उत्तररामचरितमिति नाटकस्य तृतीयाङ्कोपस्थापनेन किं नाटकीयतात्पर्यं साधितम्? अस्याङ्कस्य नाम किम्? 7½+½=8

२. सुरगिरा देवनागर्या लिप्या च सप्रसङ्गं व्याख्या कार्या। 4

कष्टं जनः कुलधनैरनुरञ्जनीयस्तन्नो यदुक्तमशिवं न हि तत्क्षमं ते।
नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा मूर्ध्नि स्थितिर्न चरणैरवताडनानि।।

**अथवा,**

पुरोत्पीडे तटाकस्य परीवाहः प्रतिक्रिया।

शोकक्षोभे च हृदयं प्रलापैरेव धार्यते।।

[*Turn over*]

३. **त्रयः प्रश्नाः** सुरगिरा देवनागर्या लिप्या च समाधेयाः। 1×3=3

(क) आत्रेयी कुतः किमर्थं दण्डकारण्यं गतवती?

(ख) क आसीत् शम्बुकः?

(ग) '... ते हि नो दिवसा गताः!' कस्य समयस्य निर्देशोऽत्र क्रियते?

(घ) '... ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्।' कस्मिन् प्रसङ्गे इदमुक्तम्?

(ङ) रामस्य करुणो रसः कीदृशः?

४. 'मृच्छत्कटिकस्य प्रथमाङ्के दर्शितं विटचरित्रम् अवलम्ब्य संक्षिप्तो निबन्धो रचनीयः। 7

**अथवा,**

मृच्छकटिकस्य तृतीयाङ्के चतुर्थाङ्के च शर्विलक-वृत्तान्तोपस्थापनेन किं नाटकीयं तात्पर्यं साधितम्? 7

५. अधोलिखिताः **चत्वारः प्रश्नाः** सुरगिरा देवनागर्या समाधेयाः। 2×4=8

(क) 'मृच्छकटिकमि'ति प्रकरणे पीडको राजा किंनामधेयः? कस्तमपसार्य राजा बभूव?

(ख) विदूषकः रेभिलस्य संगीतं श्रुत्वा किमवदत्?

(ग) किमर्थं वसन्तसेना चारुदत्तस्य गृहं प्रविष्टा?

[*Turn over*]

(घ) 'अर्थतः पुरुषो नारी या नारी सार्थतः पुमान्।' — कस्मिन् प्रसङ्गे वक्ता इदमुक्तवान् इति विव्रियताम्।

(ङ) 'उन्मीलिताऽपि दृष्टिर्निमीलितेवान्धकारे।।' — कस्मिन् प्रसङ्गे केनोक्तमिदम्?

(च) 'पञ्चेन्द्रियसमायुक्तो नरो व्यापाद्यते त्वया।' — कदा केनोक्तमिदम्?

---